श्री वराहाष्टकं

श्री वराहाष्टकं

कमलायतनेत्राय कमलायतनोरसे |
वराहवपुषे दैत्यवराहवपुषे नमः ||1||

वामांसभूषायितविश्वधात्री
वामस्तनन्यस्तकरारविंदः |
जिघ्रन मुखेनापि कपोलमेनां
जीवातुरस्माकगुरोः स जीयात् ||2||

वेदिस्तनूराहवनीयमास्यं
बर्हीं षि लोमानि जुहूश्च नासा |
शम्या च दंष्ट्राजनि यस्य यूपो
वालो मखात्मा स पुनातु पोत्री ||3||

पापेन दैन्येन भवांबुराशौ
निपातितं मां निरवग्रहोर्मौ |
धूतारिरद्धृत्य धरामिवोच्चैः
कुर्यान्मुदं मे कुहनावराहः ||4||

वेशंतति व्रतजुषां हृदयं मुनीनां
वेगापगाविहृतिकाननचंक्रमाणां |
मुस्तागणंति किल यस्य सुरारिवर्गाः
कोलः स कोऽपि कुशलं कुरुतादजस्त्रं ||5||

कल्याणमंकुरति यस्य कटाक्षलेशा-
द्यस्य प्रिया वसुमती सवनं यदंगं |
अस्मद्गुरोः कुलधनं चरणौ यदीयौ
भूयः शुभं दिशतु भूमिवराह एषः ||6||

कल्पांतसंततधनाघननिर्विघात-
निर्घातवातरवनिष्ठुरतारधीरं |
मायाकिटेबेधिरितगृहिणश्रवस्कं
घोणापुटीघुरघुरारसितं पुनातु ||7||

झटिति विलुठदूर्मीचाटुवाचाटसिंधु-
स्फुटपटहविदस्रस्फोटदीप्तोटमुद्यं |
खरखुरपुटघाताधूतखाटारिवाटः |
कपटकिटिरघौघाटोपमुच्चाटयेन्नः ||8||

यत्कारिकादर्पणाख्यकृतिनावा भवांबुधिं |
संतस्तरंति वरदगुरवे श्रीमते नमः ||9||

इति श्रीवराहाष्टकं संपूर्णं |